विभावविशेषः । यथा,—
"आलम्बनोद्दीपनाख्यौ तस्य भेदावुभौ स्मृतौ ।
उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये" ॥ ते च ।
"आलम्बनस्य चेष्टाद्या देशकालादयस्तथा" ॥
चेष्टादीत्यादिशब्दात् रूपभूषणादयः । कालादि इत्यादिशब्दात् चन्द्रचन्दनकोकिलालापभ्रमरझङ्कारादयः । इति साहित्यदर्पणे ॥ ३य परिच्छेदः ॥)

उद्दीप्तः, त्रि, (उत् + दीप् + क्त ।) प्रकाशितः ॥

उद्दीप्रं, क्ली, (उत् + दीप् + रक् ।) गुग्गुलुः । इत्यमरटीकायां भरतधृतवाचस्पतिः ॥

उद्देशः, पुं, (उत् + दिश् + घञ् ।) अनुसन्धानम् । अन्वेषणम् ॥ (न्यायमते नाम्ना निर्देशः । अभिधानं यथा,—"पदार्थोद्देशः" । समासकथनम् । यथा, "समासकथनमुद्देशः । यथा,शल्यमिति" ॥ पर्व्वतस्य गण्डकूपः । निर्द्देशः । विवरणम् ।
"इत्येष ते मयोद्देशो मातृणां प्रकीर्त्तितः" ।
इति महाभारते । स्थानम् । प्रदेशः ।
"सपर्व्वतवनोद्देशा दक्षिणार्थे स्वयम्भुवा" ।
इति महाभारते ॥)

उद्देशकः, त्रि, (उत् + दिश् + ण्वुल् ।) उद्देशकर्त्ता । उदाहरणम् । इति लीलावती ॥

उद्देश्यः, त्रि, (उत् + दिश् + ण्यत् ।) उद्देष्टव्यः । उद्देशनीयः । प्रयोजनम् ॥ (यत् उद्दिश्य विधेयस्य प्रवृत्तिः भवति तत् । अनुवाद्यम् ॥)

उद्देहिका, स्त्री, (उद्गतो देहो यस्याः ।) कीटविशेषः । तत्पर्य्यायः । उपजिह्विका २ उत्पादिका ३ वटिः ४ दिवी ५ । इति हारावली ॥

उद्द्रावः, पुं, (उद्द्रवणम् । द्रु + उदिश्रयतियौतिपूद्रुव- इति घञ् ।) पलायनम् । इत्यमरः ॥

उद्धतः, पुं, (उत् + हन् + क्त ।) राजमल्लः । इति त्रिकाण्डशेषः ॥

उद्धतं, त्रि, (उत् + हन् + क्त ।) अविनीतम् । इति हेमचन्द्रः ॥ (यथा, उत्तरचरिते षष्ठाङ्के ।
"धीरोद्धता नमयतीव गतिर्धरित्रीम्" ।
"मदमानसमुद्धतं नृपं न वियुङ्क्ते नियमेन मूढ़ता" ।
इति किराते । २ । ४९ ॥ उत्थितः । उत्क्षिप्तः । आहतः । चालितः । यथा, —शाकुन्तले १म अङ्के ॥
"आत्मोद्धतैरपि रजोभिरलङ्घनीयाः" ।
निविड़ः । घोरः । यथा, पञ्चतन्त्रम् ॥ "तुषारवर्षोद्धतप्रवर्षघनधारानिपातसमाहतम्" ॥)

उद्धतमनस्कत्वं, क्ली, (उद्धतं गर्व्वितं मनो यस्य तस्य भावः ।) गर्व्वः । अभिमानः । इति शब्दरत्नावली ॥

उद्धरणं, क्ली, (उत् + हृ + ल्युट् ।) उद्धारः । वान्तान्नम् । उन्मूलनम् । इति मेदिनी ॥ मुक्तिः । इति शब्दरत्नावली ॥ (कण्टकादीनां ऋणादेर्व्वा शोधनम् । निराकरणम् । उत्तोलनम् । यथा,—
"बलवानपि तु श्रीमाञ्छाङ्कुलोद्धरणोद्धरः" ।
इति महाभारते ।
"कण्टकोद्धरणे नित्यमातिष्ठेत् यत्नमुत्तमम्" ॥
इति मनुः ॥ ९ । २५२ । व्यसनादिभ्यो विमोचनम् ।
"सप्त व्यतीयुस्त्रिगुणानि तस्य
दिनानि दीनोद्धरणोचितस्य" ॥
इति रघुः । २ । २५ ॥)

उद्धर्षः, पुं, (उद्गतो हर्षो यस्मिन् ।) उत्सवः । इत्यमरः ॥ (यथा, रामायणे । ४ काण्डे ।
"अशक्तोऽस्मि रणोद्धर्षे तमप्रविशरणं ग्रहम्" ॥)

उद्धर्षणं, क्ली, (उत् + हृष् + ल्युट् ।) रोमाञ्चः । इति हेमचन्द्रः ॥ (त्रि, आनन्दकरम् । रोमाञ्चकरम् ।) (यथा रामायणे २ । २ । १ ॥
"ततः परिषदं सर्व्वामामन्त्र्य वसुधाधिपः ।
हितमुद्धर्षणं चैवमुवाच प्रथितं वचः" ॥)

उद्धवः,पुं,(उद्धुनोति दुःखमिति । उत् + धूञ् + अच् ।) उत्सवः । इत्यमरः ॥ यज्ञाग्निः । यादवविशेषः । इति मेदिनी ॥ यथा, श्रीभागवतम् ॥
"वृष्णीनां सम्मतो मन्त्री कृष्णस्य दयितः सखा ।
शिष्यो वृहस्पतेः साक्षादुद्धवो बुद्धिसत्तमः" ॥

उद्धानं, क्ली, (उद्धीयतेऽस्मिन् । उत् + धा + ल्युट् ।) चुल्ली । इत्यमरः ॥

उद्धानः, त्रि, (उत् + धा + ल्युट् ।) उद्गतः । वमितः । इति मेदिनी ॥

उद्धान्तः, पुं, (उद्धान्यते इति उत् + धन् + णिच् + क्त ।) निर्मदहस्ती । इत्यमरः ॥ उद्वान्तः । इति रमानाथः ॥

उद्धारः, पुं, (उत् + हृ + घञ् ।) ऋणम् । इत्यमरः ॥ उद्धृतिः । इति मेदिनी ॥ ("निमग्नस्य पुनरुद्धार एव दुर्लभः" । इति वृहदारण्यकोपनिषत् । मोचनम् । यथा, शतपथब्राह्मणे १३ । ३ । ४ । २ ।
"अश्वस्य वयमुद्धारमुद्धरामहै" । मोक्षः । निर्व्वाणम् ॥ * ॥ उद्ध्रियते साधारणधनात् इत्युद्धारः । यद्वा, साधारणद्रव्यात् यत् गरिष्ठं तदुद्धारः । इति श्रीनाथः । उद्ध्रियते साधारणधनात् निष्कृष्य विशेषनिरूतया एव बोध्यते इत्युद्धार- इति अच्युतानन्दः । साधारणत्वेन उद्ध्रियते इति उद्धार इति रघुनन्दनः । उद्ध्रियते साधारणधनात् वहिर्भाव्यते इत्युद्धार इति श्रीकृष्णः । यथाह मनुः ९ । ११२ ॥
"ज्येष्ठस्य विंश उद्धारः सर्व्वद्रव्याच्च यद्वरम् ।
ततोऽर्द्धं मध्यमस्य स्यात् तुरीयन्तु यवीयसः" ॥
ज्येष्ठस्य विंश उद्धारः उद्ध्रियते इत्युद्धारः ज्येष्ठस्याविभक्तसाधारणधनात् उद्धृत्य विंशतितमो भाग इति तट्टीकायां कुल्लूकभट्टः ॥ * ॥ जयानन्तरं शत्रुभ्यो लब्धं धनादिकम् । यदुक्तं मनुना ७ । ९७ ।
"राज्ञश्च दद्युरुद्धारमित्येषा वैदिकी श्रुतिः ।
राज्ञा च सर्व्वयोधेभ्यो दातव्यमपृथक् जितम्" ॥
"उद्धारं योद्धारः राज्ञे दद्युः । उद्ध्रियते इत्युद्धारः जितधनात् उत्कृष्टधनं सुवर्णरजतभूम्यादि राज्ञे समर्पणीयम्" । इति तट्टीका ॥)

उद्धारं, क्ली, (उत् + धृ + घञ् ।) उद्धानम् । इत्यमरटीकायां स्वामी ॥ उनन् आका इत्यादि भाषा ।

उद्धारणं, क्ली,(उत् + हृ + णिच् + ल्युट् ।) उद्धारकरणम् । उत्तोलनम् ॥

उद्धारा, स्त्री, गुड़ूची । इति शब्दचन्द्रिका ॥

उद्धूननं, क्ली, (उत् + धूञ् + णिच् + ल्युट् ।) एक-त्रितैलालवङ्गकर्पूरकस्तूरीमरिचलवचूर्णम् । इति पाकराजेश्वरः ॥

उद्धूषणं, क्ली, (उत् + धूष + ल्युट् ।) रोमाञ्चः । इति हलायुधः ॥

उद्धृतः, त्रि, (उत् + हृ + क्त ।) कृतोद्धरणम् । तोला इति भाषा । तत्पर्य्यायः । समुदक्तः २ । इत्यमरः ॥ उत्क्षिप्तः । परिस्तृतोज्भितः । इति मेदिनी ॥ ("उद्धर्तुमैच्छत् प्रसभोद्धृतारिः" । इति रघुः । २ । ३० तथा नैषधे । १ । ६९ ।
"इतीव वाहैर्निजवेगदर्पितैः
पयोधिरोधक्षममुद्धृतं रजः" ॥)

उद्ध्मानं, क्ली, (उत् ध्मायते अग्निरत्र । ध्मा शब्दाग्निसंयोगयोः उत्पूर्व्वात् तस्मात् ल्युट् ।) चुल्ली । इत्यमरटीकायां भरतः ॥

उद्ध्यः, पुं, (उज्झति कूलमिति । उज्झ + क्यप् । निपातनात् सिद्धम् ।) नदः । इति व्याकरणम् ॥ ("तोयदागमइवोद्ध्यभिद्ययोः" । इति रघुः ११ । ८ ।
"कूलं भिद्योद्ध्यसन्निभौ" ॥ इति भट्टिः । ५ । २२ ॥)

उद्बुद्धः, त्रि, (उत् + बुध + क्त ।) विकसितः । इति हलायुधः ॥ (प्रबुद्धः । यथा तिथितत्त्वे,—
"उद्बुद्धां च जगद्धात्रीं पूजयेत् दीपमालया" ॥
यथा, साहित्यदर्पणे ३ । १६२ ।
"उद्बुद्धं कारणैः स्वैः स्वैर्व्वहिर्भावं प्रकाशयन् ।
लोके यः कार्य्यरूपः सोऽनुभावः काव्यनाट्ययोः" ॥)

उद्बोधः, पुं, (उत् + बुध् + घञ् ।) किञ्चित् ज्ञानम् ॥ (यथा साहित्यदर्पणे तृतीयपरिच्छेदे ४१ ।
"उत्साहादिसमुद्बोधः साधारण्याभिमानतः ।
नृणामपि समुद्रादिलङ्घनादौ न दुष्यति" ॥)

उद्भटः, पुं, (उत् + भट् + अप् ।) कच्छपः । सूर्य्यः । इति मेदिनी ॥ (सूर्पं इति केचित् ॥)

उद्भटः, त्रि, (उत् + भट् + अप् ।) प्रवरः । ("पदे पदे सन्ति भटा रणोद्भटाः" ।) इति नैषधः ॥ श्रेष्ठाशयः । तत्पर्य्यायः । महेच्छः २ उदारः ३ उदात्तः ४ उदीर्णः ५ महाशयः ६ महामनाः ७ महात्मा ८ । इति हेमचन्द्रः ॥

उद्भवः, पुं, (उद्भवनं उद्भवत्यस्मादिति वा । उत् + भू + अप् ।) जन्म । उत्पत्तिः । इत्यमरः ॥ ("दिलीपसूनुर्मणिराकरोद्भवः" । इति रघुः । ३ । १८ । "विष्णुपादोद्भवा गङ्गा" । इति पुराणम् । विष्णुः । प्रपञ्चं प्रत्युपादानकारणत्वात् ॥)

उद्भिजः, त्रि, उद्भिज्जः । इत्यमरटीकायां रमानाथः ॥

उद्भिज्जं, त्रि, (उद्भेदनमिति उद्भित् सम्पदादित्वात् क्विप् । तस्मात् जायते यत् । उद्भित् + जन् + ड ।) उद्भिद्यजातमात्रम् । तच्च तरुगुल्मादि । इत्यमरः ॥ (यथा, मनुः । १ । ४६ । "उद्भिज्जाः स्थावराः सर्व्वे वीजकाण्डप्ररोहिणः" । "इन्द्रगोपमण्डूकप्रभृतय- उद्भिज्जाः" ॥ इति सूत्रस्थाने प्रथमेऽध्याये सुश्रुतेनोक्तम् ॥)

उद्भित्, [द्] त्रि, (उद्भिनत्ति भूमिमिति । उत् + भिद् + क्विप ।) उद्भिन्नम् । इत्यमरः ॥ तच्च पञ्चधा । वृक्षः १ गुल्मः २ लता ३ वल्ली ४ तृणम् ५ ॥ (यथा, महाभारते आदिपर्व्वणि । "संस्वेदजा